पुरुषेभ्यो नमः। दक्षिणस्यां यमाय नमः। यमपुरुषेभ्यो नमः। पश्चिमायां वरुणाय नमः। वरुणपुरुषेभ्यो नमः। उत्तरस्यां सोमाय नमः। सोमपुरुषेभ्यो नमः। ननु मनौ ।३।८७।
“इन्द्रान्तकाप्पतीन्दुभ्यः सानुगेभ्यो बलिं हरेत्।”
इत्युक्तेः अन्तकाय नमः। अन्तकपुरुषेभ्यो नमः इत्यादिप्रयोगः साधुः स्यात्। अत उच्यते यद्यपि शब्दावगम्यत्वाद्देवतात्वस्यान्तकाप्पतीन्दुशब्दैरेवोद्देशो युक्तस्तथापि बह्वृचानुष्ठानसंवादाद्बह्वृचगृह्ये च यमाय यमपुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यो सोमाय सोमपुरुषेभ्य इति प्रतिदिशमिति पाठात् यथोक्त एव प्रयोगः। मरुद्भ्यो नमः इति द्वारे बलिं दद्यात्। जले अद्भ्यो नमः। मुषलोलूखले वनस्पतिभ्यो नमः। वास्तुपुरुषस्य शिरःप्रदेशे उत्तरपूर्व्वस्यां दिशि श्रियै नमः इति बलिं दद्यात्। वास्तुपुरुषस्य पाददेशे दक्षिणपश्चिमायां दिशि भद्रकाल्यै नमः। इत्यनेन दद्यात्। केचित्तु गृहस्थशयनस्य शिरःस्थान-भूप्रदेशे श्रियै नमः। चरणभूप्रदेशे भद्रकाल्यै नमः इत्याहुः। ततो गृहमध्ये ब्रह्मणे पतये नमः वास्तोः पतये नमः इत्यनेन बलिं हरेत्। गृहाकाशे विश्वेभ्यो देवेभ्यो नमः। दिवाचरेभ्यो भूतेभ्यो नमः। दिवानक्तचारिभ्यो ’भूतेभ्यो नमः इत्यनेन दद्यात्। गृहस्योपरिस्थितगृहे सर्व्वात्मभूतये नमः इत्यनेन बलिं दद्यात्। केचित् बलिदातुः पृष्ठदेशस्थभूभागे सर्व्वात्मभूतये नम इत्यनेन दद्यादित्याहुः। ततो बलिदात्रा प्राचीनावीतिना दक्षिणामुखेन च सता उक्तबलिदानावशिष्टं सर्व्वमन्नं दक्षिणस्यां दिशि पितृभ्यः स्वधा इत्यनेन देयम्। ततोऽन्यदन्नं पात्रे समुद्धृत्य यथा रजसा न संगृह्यते तथा भुवि शनकैः श्वपतितचाण्डालपापरोगिवायसकृमिप्रभृतिभ्यो दद्यात्। एवं नित्यं कुर्व्वन् परं स्थानमभ्येतीति ॥ * ॥) यथा,—

“येऽर्च्चयन्ति सदा विष्णुं निश्चलेनान्तरात्मना।
न ते भूयोऽभिजायन्ते श्वेतद्वीपनिवासिनः ॥
एवं पूज्य विधानेन अतिथिं भोजयेत्ततः।
सायं प्रातर्य्यदन्नं स्यात् हुत्वाग्निं तेन तद्बलिम् ॥”
इति वह्निपुराणम् ॥*॥

“ततोऽग्नेस्तर्पणं कुर्य्याद्दद्याच्च बलिमित्यथ।
ब्रह्मणे गृहमध्ये तु विश्वेदेवेभ्य एव च ॥
धन्वन्तरिं समुद्दिश्य प्रागुदीच्यां बलिं क्षिपेत्।
प्राच्यां शक्राय याम्यायां यमाय बलिमाहरेत् ॥
प्रतीच्यां वरुणायैव सोमायोत्तरतो बलिम्।
दद्याद्धात्रे विधात्रे च बलिं द्वारे गृहस्य च ॥
अर्य्यम्णे च बलिं दद्यात् गृहेभ्यश्च समन्ततः।
नक्तचरेभ्यो भूतेभ्यो बलिमाकाशतो हरेत् ॥
पितॄणां निर्व्वपेच्चैव दक्षिणाभिमुखः स्थितः।
गृहस्थस्तत्परो भूत्वा सुसमाहितमानसः ॥
ततस्तोयमुपादाय तेष्वेवाचमनाय वै।
स्थानेषु निक्षिपेत् प्राज्ञस्तास्ता उद्दिश्य देवताः ॥
एवं गृहबलिं कृत्वा गृहे गृहपतिः शुचिः।
आप्यायनाय भूतानां कुर्य्यादुत्सर्गमादरात् ॥
श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि।
वैश्वदेवं हि नामैतत् सायं प्रातरुदाहृतम् ॥”
इति मार्कण्डेयपुराणम् ॥*॥

अथ बलिः। वैश्वदेवपश्चाद्भूमौ जलं क्षिप्त्वा तच्छेषान्नेन साङ्गुष्ठेन देवतीर्थेन ॐ विश्वेभ्यो देवेभ्यो नमः इति बलिं दद्यात् तदुपरि जलमनेन मन्त्रेण दद्यात् एवं सर्व्वत्र जलप्रक्षेपः। तदुत्तरे ॐ सर्व्वेभ्यो देवेभ्यो नमः। उभयोर्द्दक्षिणे प्राचीनावीती पातितवामजानुर्द्दक्षिणामुखो दक्षिणाग्रकुशत्रयोपरि सतिलमन्नं शुष्ककुशत्रयेण पितृतीर्थेन ॐ पितृभ्यः स्वधा। ततः सर्व्वेषां बलीनामुपरि सर्व्वत्र प्रत्येकं जलनिषेकः। तत उपवीती देवतीर्थेन बलिपात्रप्रक्षालनोदकेनान्नेन ऐशान्यां ॐ यक्ष्मैतत्ते नमस्तेऽस्तु मा माहिंसीः ॐ यक्ष्मणे नमः इत्यनेन दद्यात् जलञ्च देयम्। इत्यावश्यकबलिः ॥*॥ अथ काम्यबलिः। बलीनां पश्चिमे जलेनोत्तराग्रां रेखां कृत्वा भूमौ जलं दत्त्वा,—

“ॐ देवा मनुष्याः पशवो वयांसि
सिद्धाः सयक्षोरगदैत्यसंघाः।
प्रेताः पिशाचास्तरवः समस्ता
ये चान्नमिच्छन्ति मया प्रदत्तम् ॥
पिपीलिकाः कीटपतङ्गकाद्या
बुभुक्षिताः कर्म्मनिबन्धदेहाः।
प्रयान्तु ते तृप्तिमिदं मयान्नं
तेभ्यो विसृष्टं सुखिनो भवन्तु ॥
येषां न माता न पिता न बन्धु-
र्नैवान्नसिद्धिर्न तथान्नमस्ति।
तत्तृप्तयेऽन्नं भुवि दत्तमेतत्
प्रयान्तु तृप्तिं मुदिता भवन्तु ॥
ॐ भूतानि सर्व्वाणि तथान्नमेत-
दहञ्च विष्णुर्न यतोऽन्यदस्ति।
तस्मादहं भूतनिकायभूत-
मन्नं प्रयच्छामि भवाय तेषाम् ॥
चतुर्द्दशो भूतगणो य एष
तत्र स्थिता येऽखिलभूतसंघाः।
तृप्त्यर्थमन्नं हि मया विसृष्टं
तेषामिदन्तेऽमुदिता भवन्तु ॥”

इत्युच्चार्य्य बलिं दद्यात्।
“ॐ ऐन्द्रवारुणवायव्याः सौम्या वै नैरृतास्तथा।
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम् ॥”
ॐ वायसेभ्यो नम इति पुनर्जलं देयम्।
भूमौ जलं दत्त्वा,—
“ॐ श्वानौ द्वौ श्यावशवलौ वैवस्वतकुलोद्भवौ।
ताभ्यां पिण्डं प्रयच्छामि स्यातामेतावहिंसकौ ॥”
ॐ श्वभ्यां नमः ततः पुनर्जलं देयम्। भूमौ जलं दत्त्वा ॐ चण्डालपतितपापरोगिभ्यो नमः पुनर्जलं देयम्। भूमौ जलं दत्त्वा ॐ धर्म्मराजचित्रगुप्ताभ्यां नमः ततः पुनर्जलदानम्। ततो जलं स्पृष्ट्वा अग्निं विसृज्य नमस्कृत्य संप्राप्य जले क्रियमाणे बलीनप्सु जले वा क्षिपेत् पिण्डवत्। अन्नाभावे केवलजलेन पात्रान्तरस्थजले कुर्य्यात्। ततः कुशकुसुमसहितं जलपूर्णं ताम्रादिपात्रं हस्ते निधाय महावामदेव्य ऋषिर्विराड्गायत्री छन्द इन्द्रो देवता शान्तिकर्म्मणि जपे विनियोगः। ॐ कयानश्चित्र आभुवदूती सदा वृधः सखा कया सचिष्ठया वृता। ॐ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः दृढ़ाचिदारुजे वसु। ॐ अभीषुणः सखीनामविता जरितॄणां शतम्भवास्यूतये। इति वामदेव्यं गीत्वा गानाशक्तौ त्रिः पठित्वा ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो वृहस्पतिर्दधातु। ॐ स्वस्तीति त्रिः पठेत्। पार्व्वणश्राद्धादिकरणे पार्व्वणादिकं कृत्वैव वैश्वदेवादिकं कार्य्यं रात्रावपि पाकसत्त्वे यत्किञ्चिद्द्रव्यसत्त्वे वा वैश्वदेवबलिकर्म्मणी कुर्य्यात्। शूद्रस्तु ब्राह्मणाभावे मन्त्रार्थं भावयन् नमो नम इति मन्त्रेण कुर्य्यात्। अविभक्तानामेककरणादेव सर्व्वेषां सिद्धिः। इत्याह्निकाचारप्रयोगतत्त्वम् ॥ * ॥ नवग्रहबलिर्यथा,—

“गुड़ौदनं रवेर्द्दद्यात् सोमाय घृतपायसम्।
यावकं मङ्गलायैव क्षीरान्नं सोमसूनवे ॥
दध्योदनञ्च जीवाय शुक्राय तु घृतौदनम्।
शनैश्चराय कृशरमाजमांसञ्च राहवे ॥
चित्रौदनञ्च केतुभ्यः सर्व्वभक्ष्यैः समर्च्चयेत् ॥”
सर्व्वभक्ष्यैस्तु तत्तद्द्रव्याभावे यथालाभोपपन्नैर्भक्ष्यैः। इति ग्रहयज्ञतत्त्वम् ॥ * ॥
दैत्यभेदः। इति मेदिनी। (अयं सावर्णस्य मनोरन्तरे इन्द्र आसीत्। यथा, मार्कण्डेये ।८०।१०।
“तेषामिन्द्रो भविष्यस्तु बलिर्वैरोचनिर्म्मुने ! ॥”)
स च दैत्यो विरोचनपुत्त्रः। तस्य अशनायां पत्न्यां बाणज्येष्ठं पुत्त्रशतं जातम्। इति श्रीभागवतम् ॥ यथा,—

“विरोचनस्य पुत्त्रस्तु बलिरेकः प्रतापवान्।
बलेः पुत्त्रशतं जज्ञे राजानः सर्व्व एव ते ॥
तेषां प्रधानाश्चत्वारो विक्रान्ताः सुमहाबलाः।
सहस्रबाहुर्ज्येष्ठश्च कन्ये द्वे च बलेः शुभे ॥
बलेः पुत्त्राश्च पौत्त्राश्च शतशोऽथ सहस्रशः ॥
बाणेयो नाम विख्यातो गणो विक्रान्तपौरुषः ॥”
इत्यग्निपुराणम् ॥

तस्य पूर्व्वजन्मवृत्तान्तो यथा,—
शुक्र उवाच।
“धर्म्मध्वजो नाम बभूव राजा
विदेहदेशे निजधर्म्मशीलः।
यज्वा सुवाग्मी शुभकर्म्मकर्त्ता
स विष्णुभक्तोऽनुदिनं महात्मा ॥
तस्य त्वमासीर्नृपतेः सुभृत्यो
द्वेष्टा द्विजानां पिशुनोऽविवेकी।
द्वेष्टा गुरूणां सततं त्वदाता
नो साध्वसं ते बत पारलौक्यम् ॥